## दशमः पाठः

# निम्बतरोः साक्ष्यम्पु

पुरा एकस्मिन् ग्रामे मनोहरः धर्मचन्दश्च द्वे मित्रे प्रतिवसतः। तौ विदेशात्धनं अर्जयित्वा नीतवन्तौ। तौ विचारितवन्तौ यद् गृहे इदं धनं सुरक्षितं न स्यात्। एवं विमृश्य तद् धनम् एकस्य वृक्षस्य मूले गत्र्तं विधाय निक्षिप्तवन्तौ। द्वयोर्मध्ये परस्परं मतैक्यम् अभवत् यत् यस्मै आवश्यकता भविष्यति स अपरेण सह आगत्य निष्कास्यति। मनोहरः सरलः सत्यनिष्ठः चासीत् किन्तु धर्मचन्दः अतीव चतुरः छद्मबुद्धिश्च आसीत्।



धर्मचन्दः अन्येद्युः निभृतं गत्वा सर्वं धनम् आहृतवान्। ततश्च धर्मचन्दः मनोहरम् अवोचत्-" मित्र । चलतु, किञ्चद् धनम् आहर्तव्यम्।" द्वौ अपि वृक्षस्य अन्तिकम् आगतवन्तौ। तत्र धनं नासीत्। धर्मचन्दः मनोहरम् आक्षिप्तवान् यत्तेन धनम् अपहृतम् इति। ततस्तौ विवदमानौ राजानं प्रति गच्छतः। द्वयोः विवादं श्रुत्वा राजा अब्रवीत्-"भवतु नाम, श्वः निम्बवृक्षस्य साक्ष्यम् अवाप्य एव कश्चित् निर्णयः भविता।"सत्यनिष्ठः मनोहरः विचारितवान् यद् इदमेव समीचीम्। निम्बतरुः असत्यं न वक्ष्यति। धर्मचन्दोऽपि प्रसन्नः आसीत्।अपरेद्युः राजा द्वाभ्यां सह निम्बवृक्षं प्रत्यगच्छत्। तैः सह समुत्सुकानां जनानां सम्मर्दः अपि आसीत्। ते सर्वे सत्यं ज्ञातुं वा´ □छन्ति स्म।



राजा निम्बवृक्षं पृष्टवान्-”हे निम्बदेव! कथय, धनं केन अपहृतम् ?“‘‘मनोहरेण‘‘ -इति निम्बमूलात्स्वरः प्रकटितः। एतत् श्रुत्वा मनोहरः बाष्पकण्ठः रुरोद अब्रवीत् च-‘‘ महाराज! एष निम्बतरुः असत्यं वक्तुं नार्हति। अत्र काचित् छद्मयोजना वर्तते। अहं सद्य एव प्रमाणितं करोमि।‘‘ मनोहरः शुष्केन्धनं संहृत्य वृक्षमूले निधाय अग्निं प्रज्वालितवान्। तत्कालमेव वृक्षमूलात्- ”रक्षतु-रक्षतु‘‘ इति स्वरसंयोगः श्रुतः। राजा सैनिकान् आदिष्टवान्- तत्रयोऽपि भवेत् तं बहिः आनयतु।‘‘ सैनिकाः वृक्षकोटरे स्थितं जनं बहिः आनीतवन्तः। तं दृष्ट्वा सर्वे विस्मृताः आसन्। यतोहि स धर्मचन्दस्य वृद्धः पिता आसीत्। राजा सर्वम् अपि ज्ञातवान्। स पितरं पुत्रञ्च कारागारे निक्षिप्तवान्। अपि च, तत्सर्वम् धनम् सपुरस्कारं मनोहराय समप्र्य तं सभाजितवान्। विमृश्यत्र सोचकर। गत्र्तंत्र गड्ढा। द्वयोर्मध्ये त्र दोनों के बीच में। छद्मबुद्धिः त्र बेईमान। आहृतवान् त्र निकाल ले आया। अन्तिकम् त्र समीप। भवतु नाम त्र जाने दीजिए। अपरेद्युः त्र दूसरे दिन। समुत्सुक त्र अत्यधिक आतुर। सम्मर्दः त्र भीड़। बाष्पकण्ठः त्र रुंधे गले से। सद्य एव त्र शीघ्र ही। शुष्केन्धनं त्र सूखी लकड़ियाँ । संहृत्य त्र इक्कठा करके। निधाय त्र रखकर। स्वरसंयोगः त्र आवाज का संयोग । विस्मृताः त्र विस्मित या आश्चर्य चकित। सभाजितवान्त्र पुरस्कृत किया। विश्रम्भात् त्र विश्वास

अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

धर्मचन्दश्च निक्षिप्तवन्तौ द्वयोर्मध्ये

मतैक्यम् निष्कास्यति सत्यनिष्ठः

छद्मबुद्धिश्च आहृतवान् आहर्तव्यम्

**2. एकपदेन उत्तरत-**

यथा- मनोहरस्य मित्रं कः आसीत ? धर्मचन्दः

(क) तौ अर्जितधनं कुत्र निक्षिप्तवन्तौ ?

(ख) मनोरस्य स्वभावः कीदृशः आसीत् ?

(ग) अन्येद्युः सर्वं धनं कः आहृतवान् ?

(घ) वृक्षकोटरे कः आसीत् ?

**3. म×जूषातः क्रियापदानि चित्वा वाक्यानि पूरयत-**

(क) तौ विदेशात् धनं ......................नीतवन्तौ।

(ख) धर्मचन्दः अतीव चतुरः.................आसीत्।

(ग) ततस्तौ विवदमानौ ...................प्रति गच्छतः।

(घ) निम्बतरु........................... न वक्ष्यति।

(ड़) स पितरं पुत्रं □च करागारे....................।

**4. रेखांकित पदेषु कारकस्य नामोल्लेखं कुरुत-**

यथा- स ग्रामं गच्छति। (कर्म कारकम्)

(क) तौ विदेशात् धनं अर्जयित्वा नीतवन्तौ

(ख) स अपरेण सह आगत्य निष्कास्यति

(ग) द्वौ अपि वृक्षस्य अन्तिकम् आगत्वन्तौ

(घ) राजा सैनिकान् आदिष्टवान्

(ड़) सैनिकाः वृक्षकोटरे स्थितं जनं आनीतवन्तः

**5.सन्धि-विच्छेदं कुरूत-**

पदम् सन्धि-विच्छेदः

(क) धर्मचन्दश्च ................................

(ख) द्वयोर्मध्ये ................................

(ग) समुत्सुकानाम् ..................................

(घ) शुष्केन्धनम् .................................

अर्जयित्वा, छद्मबुद्धिश्च, राजानं, असत्य,ं निक्षिप्तवान्।

**6.रेखांकितपदानि अधिकृत्य प्रश्पनिर्माणं कुरुत-**

(क) एकस्मिन् ग्रामे द्वे मित्रे प्रतिवसतः।

(ख) तौ विदेशात् धनं अर्जयित्वा नीतवन्तौ।

(ग) धर्मचन्दः अतीव चतुरः छद्मबुद्धिश्च आसीत्।

**7-संस्कृतभाषायाम् अनुवादं कुरुत-**

(क) एक गाँव में दो मित्र रहते थे।

(ख) वे दोनों विदेश से धन अर्जित कर ले आये।

(ग) मनोहर सरल और सत्यनिष्ठ था।

(घ) सैनिक वृक्ष के कोटर में स्थित व्यक्ति को बाहर ले आये।

**शिक्षण- सङ्केतः**

1. बालकैः स्वशब्देषु कथां लेखयत।

2. अन्यकथां श्रोतुं श्रावयितुं च कथयत।

**ध्यातव्यम्-**

विभक्तिः द्विविधा भवति- 1 कारकविभक्तिः। 2 उपपदविभक्तिः।

1. कारकविभक्तिः- क्रियाम् आदाय या विभक्तिः भवति सा कारकविभक्तिः भवति, यथा- रमेशः ग्रामं

गच्छति, वीरेन्द्रः कन्दुकेन खेलति।

2. उपपदविभक्तिः- पदम् आश्रित्य प्रयुक्ता विभक्तिः 'उपपदविभक्तिः' इति कथ्यते, यथा- ग्रामं परितः वृक्षाः सन्ति (गाँव के चारों ओर वृक्ष हैं)। रामेण सह लक्ष्मणः गच्छति। अत्र 'परितः' (चारोंओर) इति योगे ग्रामपदात् द्वितीया तथा च 'सह' इति योगे रामपदात् प्रयुक्ता तृतीया विभक्तिः

उपपदविभक्तिः अस्ति।

लोभात्, प्रमादात्, विश्रम्भात् त्रिभिर्नाशो भवेन्नृणाम्